ख्यरोदनरतौषधसर्वधाम ॥ २१ ॥ जीवार्कविच्छुक्र-
शनैश्चरेषु लग्नारिजामित्रसुखत्रिगेषु ॥ स्थितिः शतं
स्याच्छरदां सितार्कारेज्ये तनुत्र्यंगसुते शते द्वे ॥२२॥
लग्नांबरायेषु भृगुज्ञभानुभिः केंद्रे गुरौ वर्षशतायुरा-
लयः ॥ बंधौ गुरुव्योम्नि शशी कुजार्कजौ लाभे तदा-
शीतिसमायुरालयः ॥ २३ ॥ स्वोच्चे शुक्रे लग्नगे वा
गुरौ वेश्मगतेऽथवा ॥ शनौ स्वोच्चे लाभगे वा ल-

र्धान्यगृहम् ॥ " इति ॥ २१ ॥ अत्रगृहारंभप्रसक्तानुप्रसक्तसामान्यतःप्राग्लग्नबलम
प्यभिधायेदानीमारब्धगृहाणांनियतस्थानावस्थित्यानियतायुर्दाययोगद्वयमुपजातिकया
ह ॥ जीवेति ॥ अत्रयोगद्वयेग्रहस्थानयोर्यथासंख्यंसंबंधः । यथा जीवोलग्ने अर्कःसू
र्यःषष्ठे विद्बुधोजामित्रेसप्तमे शुक्रश्चतुर्थे शनैश्चरस्तृतीयेएवंनियतस्थानावस्थितग्रहस
हितेलग्नेप्रारब्धस्यगृहस्यस्थितिरब्दशतंवर्षशतंस्यात् अयमेकोयोगः । यदाहश्री
पतिः " उदयेगुरुरस्तगृहेशशिजोबुधःसहजेतुशनिः । " इति । अथद्वितीयोयोगः ।
सित इति । शुक्रोलग्नेअर्कस्तृतीयेआरोभौमःषष्ठेईज्यःपंचमे एवंविधेलग्नेप्रारब्धगृहस्थि
तिर्द्वेशतेशतद्वयंस्यात् । यदाहश्रीपतिः " लग्नेभृगुःपुत्रगतश्चजीवः षष्ठेकुजस्तिग्मकर
स्तृतीयः । निवेशनेयस्यगृहस्यतद्धिशतद्वयं तिष्ठतिवत्सराणाम् ॥ " इति ॥ २२ ॥
अथान्यन्नियतायुर्दाययोगद्वयमिंद्रवंशाछंदसाह ॥ लग्नेति ॥ अत्रापियोगद्वयेस्थानग्रह
योर्यथासंख्यंसंबंधः लग्नेभृगुः दशमेबुधः एकादशेसूर्यः लग्नव्यतिरिक्तकेंद्रेगुरुः स्यात्त
दैवंविधेयोगेप्रारब्धालयोगृहं वर्षशतमायुरवस्थानंयस्यतादृशःस्यात् । यदाहश्रीपतिः
" शशांकजीवौखरसातलस्थौ " इति । आलयशब्दःपुंलिंगः ' गृहाःपुंसिचभूम्न्येव
निकाय्यनिलयालयाः । ' इत्यमरः । पुंसिचसंबध्यतेरूपभेदेनवापुंलिंगः । अतएव
नैषधीयेप्रयुक्तः ' निशिमाणिक्यमयायदालयाः ' इति । ' पंक्तिर्विंशति ' इत्यादिनासू
त्रेणअशीतिशतशब्दौसंख्यावाचिनौनिपातितौ । अथद्वितीयः । बंधाविति । बंधौचतुर्थे
गुरुः व्योम्निदशमेचंद्रःकुजार्कजौमंगलशनैश्चरावेकादशेतदागृहमशीतिसमावर्षाण्यायुर्य
स्यतादृशंस्यात् ॥ २३ ॥ अथलक्ष्मीयुक्तगृहयोगत्रयमनुष्टुभाह ॥ स्वोच्चेति ॥
स्वोच्चस्थेमीनस्थेशुक्रेलग्नगतेगृहंचिरंलक्ष्म्यायुक्तंस्यात् । अथवास्वोच्चस्थेकर्कस्थेगुरौ
चतुर्थस्थानगतेसातितादृशमेवगृहम् । अथवास्वोच्चस्थेतुलास्थेशनावेकादशस्थानगे
पिलक्ष्मीयुक्तंगृहंस्यादेतत्प्रत्येकंयोगत्रयम् । यदाह श्रीपतिः " स्वोच्चवर्तिनिगतेविलग्न
गेदेवमंत्रिणिरसातलेऽथवा । स्वोच्चगेरविसुतेऽथवायगेस्यात्स्थितिश्चसुचिरंसहश्रिया "

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

क्ष्म्या युक्तं चिरं गृहम् ॥ २४ ॥ द्यूनांबरे यदैकोपि प-
रांशस्थो ग्रहो गृहम् ॥ अब्दांतः परहस्तस्थं कुर्याच्चे-
द्वर्णपोऽबलः ॥ २५ ॥ पुष्यध्रुवेंदुहरिसर्पजलैः सजी-
वैस्तद्वासरेण च कृतं सुतराज्यदं स्यात् ॥ द्वीशाश्वि-
तक्षिवसुपाशिशिवैः सशुक्रैर्वारे सितस्य च गृहं धन-
धान्यदं स्यात् ॥ २६ ॥ सारैः करेज्यांत्यमघांबुमूलैः
कौजेह्निवेश्माग्निसुतार्तिदं स्यात् ॥ सज्ञैः कदास्त्रार्य-

इति ॥ २४ ॥ अथ गृहस्यपरहस्तगामित्वेयोगमनुष्टुभाह ॥ द्यूनांबरेइति ॥ एकोपि ग्रहोऽत्युत्कृष्टशुभफलदातापरांशस्थःशत्रुनवांशस्थितः सन्यदिद्यूनेसप्तमेस्यादथवांबरे दशमेस्यात्तदासग्रहस्तद्गृहंप्रारब्धमब्दांतर्वर्षमध्यएवपरहस्तस्थमन्यहस्तगामिकुर्याद्वर्ण पोब्राह्मणादिवर्णस्वामी 'विप्राधीशौभार्गवेज्यौ' इत्यभिहितः सचेदबलः स्यात् । उक्तंचवसिष्ठेन "एकोग्रहश्चेत्परभागवर्तीजायागतः कर्मगतोऽथवास्यात् । करोतिगेहंपर हस्तयातंकरोतिवर्षाद्बिबलःसखेटः ॥" इति ॥ खेटोवर्णस्वामी । तदुक्तंश्रीपतिना "ए कोपिनूनंपरभागवर्तीवियत्स्मरस्थः खचरोऽत्रमध्ये । करोतिगेहंपरहस्तयातंस्याद्दुर्बलश्चेदि हवर्णनाथः" ॥ इति । यदातुवर्णाधीशः सबलः स्यात्तदापरहस्तगामीनस्यादित्यर्थतः सिद्धम्॥२५॥अथगृहारंभेनक्षत्रविशेषेणचफलविशेषाच्छुभसूचकंफलविशेषयोगद्वयंवसं ततिलकाछंदसाह ॥ पुष्येति ॥ पुष्योध्रुवाणिचप्रसिद्धानिइंदुर्मृगःहरिःश्रवणंसर्पआश्ले षाजलंपूर्वाषाढाएतैर्नक्षत्रैः सजीवैः गुरुयुक्तैर्गुर्वधिष्ठितैः तद्वासरेणबृहस्पतिवासरेण कृतंकर्तुः आरब्धंगृहंसुतान्पुत्रान्राज्यंचददातितादृशंस्यात् । यदाहवसिष्ठः "ईज्यो त्तरात्रयाहींदुविष्णुधातृजलोडुषु । गुरुणासहितेष्वेषुकृतंगेहंश्रियायुतम् ॥" इति । वारेणगृहफलविशेषश्चनारदवाक्ये "श्रवणाषाढयोश्चैवरोहिण्यांचोत्तरात्रये । गुरुवारे कृतंवेश्मराज्ययोग्यमिहोच्यते । तद्गृहेजातपुत्रस्यराज्यंभवतिनिश्चयात् ॥" नक्षत्र भेदोवचनप्रामाण्यात् । द्वीशेति । द्वीशंविशाखाअश्विअश्विनीतक्षित्वाष्ट्रवसुधनिष्ठापा शीशतभंशिवआर्द्राएतैर्नक्षत्रैः सशुक्रैः शुक्रसहितैः सितस्यशुक्रस्यवारेकृतंगेहंधनानि सुवर्णादीनिधान्यानितंदुलादीनितानिददातितादृशंगृहंस्यात् । यदाहवसिष्ठः "द्विदै वत्वाष्ट्रवारेंशरुद्रादित्यवसूडुषु । शुक्रेणसहितेष्वेषुकृतंधान्यप्रदंगृहम् ॥" इति । नार दोपि "अश्विनीशततारासुविशाखाभाद्रचित्रके । धनिष्ठादितिसंयुक्तेतथाचशुक्रवास रे ॥ गृहंनाटकशालाख्यं देवागारंकृतंशुभं । तद्वेश्मनिप्रजातस्तुकुबेरसदृशोभवेत् ॥" इति । अत्रापिनक्षत्रभेदेप्राग्वदेवसमाधिः ॥ २६ ॥ अथान्यद्योगद्वयमशुभदातृइंद्रव ज्राछंदसाह ॥ सारैरिति ॥ हस्तपुष्यरेवतीमघापूर्वाषाढामूलैः सारैर्मंगलयुक्तैः कौजे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मतक्षहस्तैर्ज्ञस्यैव वारे सुखपुत्रदं स्यात् ॥ २७ ॥ अ-
जैकपादहिर्बुध्न्यशक्रमित्रानिलांतकैः ॥ समंदैर्मंदवारे
स्याद्रक्षोभूतयुतं गृहम् ॥ २८ ॥ सूर्यर्क्षाद्युगभैः शि-
रस्यथ फलं लक्ष्मीस्ततः कोणभैर्नागैरुद्वसनं ततो

भौमसंबंधिनिअह्निवारेचकृतंवेश्मगृहमग्निसुतार्तिदमग्निपीडापुत्रपीडाचतांददातितादृशं स्यात् । यदाह वसिष्ठः " पितृमूलेज्यभाग्यार्कपौष्णभेषुचयत्कृतं । कुजेनसहितेष्वेषुगृहंसंदह्यतेऽग्निना ॥ " इति ॥ नारदोपि " मूलंचरेवतीचैवकृत्तिकाषाढमेवच । पूर्वाफाल्गुनिहस्तश्चमघाचैवतुसप्तके॥एषुभोमेनयुक्तेषुवारेतस्यैववेश्मयत् । अग्निनादह्यतेकृत्स्नंपुत्रनाशश्चजायते ॥ " इति।अत्रविशेषमाह वसिष्ठः " अग्निनक्षत्रगेसूर्येचंद्रेवासंस्थितेयदि । निर्मितंमंदिरंनूनमग्निनादह्यतेचिरात् ॥ " इति । आवश्यकत्वाद्विहितनक्षत्रानुपलब्धौमध्यमेषुभेषुगृहारंभः प्राप्तः सकृत्तिकायांमाभूदितिनिषेधः सूर्यनक्षत्रकृत्तिकायांमाभूदितिपूर्वोपि । सज्ञैरिति । रोहिण्यश्विन्युत्तराफाल्गुनीचित्राहस्तैः सज्ञैर्बुधयुक्तैर्ज्ञस्यैववारेचकृतंगेहंसुखदंपुत्रदंस्यात् । यदाह वसिष्ठः " हस्तार्यमत्वाष्ट्रदस्त्रचतुरास्येंदुभेषुच । बुधेनसहितेष्वेषुधनपुत्रसुखप्रदम् ॥ " इति ॥२७॥ अत्राशुभफलदमेकमेवयोगमनुष्टुभाह ॥ अजैकपादिति ॥ पूर्वाभाद्रपदोत्तराभाद्रपदाज्येष्ठानुराधारेवतीस्वातीभरणीनक्षत्रैः समंदैः शनैश्चरयुक्तैर्मंदस्यैववारेचप्रारब्धंगृहंरक्षोभिर्भूतैश्चयुतंस्यात् । यदाह वसिष्ठः " अजपाद्हितयेयाम्यमित्रेंद्रानिलभेषुच । यत्कृतंशनिसंयुक्तेदिह्यतेयक्षराक्षसैः ॥ " इति । दिह्यतेउपचीयते ' दिहउपचये ' इतिधातुः । नारदोपि " ज्येष्ठानुराधकेचैवभरणीस्वातिपूर्वभे । धनिष्ठास्वपिऋक्षेषुशनिस्तिष्ठेद्दिनस्यच ॥ कृपणोनामतःप्रोक्तोधनधान्यादिकेगृहे । पुत्रोजातोथवातस्मिन्गृह्यतेयक्षराक्षसैः ॥ " इति।अयं निष्कृष्टोर्थः । पूर्वंगृहारंभेनक्षत्राणिअवधार्याणिततोवृषवास्तुचक्रेशोध्यानिपश्चादिदंयोगपंचकंविचार्यमेवंसतिगृहारंभउक्तफलदाताभवेत् । अयंसर्वोपिगृहविचारःप्रासादवापीकूपादिषुध्येयः । तदुक्तं विष्णुधर्मोत्तरे " प्रासादेष्वेवमेवस्याद्वापीकूपेषुचैवहि । " इति । प्रासादोदेवगृहम् ॥ २८ ॥ अथकेषांचिन्मतेनद्वारचक्रंसफलंशार्दूलविक्रीडितेनाह ॥ सूर्यर्क्षादिति ॥ अत्रद्वारस्यचत्वारः पाषाणाआवश्यकाः द्वौ ऊर्ध्वाधोभावेनावस्थितौसमावल्पपरिमाणौ । भाषयाउत्तरंगइत्यूर्ध्वावस्थितस्यसंज्ञा । अधोवस्थितस्यतुदेहलीतिसर्वसाधारणंनाम । द्वौपार्श्वद्वये स्थितौ महापरिमाणौउच्चत्वेनसाहइतिभाषयाद्वयोरपिसंज्ञा । एवंदीर्घचतुरस्त्रद्वारंभवति । पाषाणासंभवेतुकाष्ठादेरपितत्र द्वारेचिकीर्षितेसूर्याधिष्ठितनक्षत्राद्युगभैश्चतुर्भिर्नक्षत्रैः शिरस्यवस्थितैः सद्भिःलक्ष्मीप्राप्तिरूपंफलंस्यात् । ततस्तदग्रिमैर्नागैः कोणभैर्द्वयोरवस्थित्याचतुष्कोणेष्ववस्थितैरष्टसंख्याकैर्नक्षत्रैरुद्वसनं तद्वारगृहं सर्वदाजनवासरहितंस्यात् । ततस्त

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

गजमितैः शाखासु सौख्यं भवेत् ॥ देहल्यांगुणभै-
र्मृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यं चक्रमिदं विलो-
क्य सुधिया द्वारं विधेयं शुभम् ॥ २९ ॥ इतिमुहूर्त-
चिंतामणौ वास्तुप्रकरणम् ॥ १२ ॥

दग्रिमैर्गजमितैरष्टभिर्भैः शाखासुभाषयासाहरइतिनाम तत्रावस्थितैर्गृहस्वामिनःसौख्य रूपंफलं स्यात् । ततस्तदग्रिमैर्गुणभैस्त्रिभिर्नक्षत्रैर्देहल्यामवस्थितैर्गृहपतेर्मृतिःस्यात् । ततस्तदग्रिमैर्वेदभैश्चतुर्भिर्नक्षत्रैर्मध्येस्वरूपेऽवकाशेस्थितैःसौख्यंस्यात् । फलितार्थमाह ॥ चक्रमिति ॥ इदंद्वारचक्रंविलोक्यसुधियाशुभंशुभफलदातृद्वारंविधेयंकर्तव्यम् । तदुक्तं ज्योतिर्निबंधे " द्वारचक्रंप्रवक्ष्यामिभाषितंविश्वकर्मणा । सूर्यभाद्धचतुष्कंतुद्वारस्योपरि विन्यसेत् । द्वेद्वेकोणेप्रदातव्येशाखायुग्मेद्वयंद्वयम् । अधश्चत्रीणिदेयानिवेदामध्येप्रतिष्ठिताः॥ राज्यंस्यादूर्ध्वनक्षत्रेकोणेषूद्वासनंभवेत् । शाखायांलभतेलक्ष्मीमधश्चैवमृतिंलभेत् ॥ मध्यमेषुलभेत्सौख्यंचिंतनीयंसदाबुधैः ॥ " इति । द्वारचक्रंयथा । अथ द्वारस्थापनम् । " द्वारस्थापननक्षत्राण्युच्यंतेऽश्विनिचोत्तरा । (हस्तपुष्यश्रुतिमृगाः) स्वातौपूष्णिच रोहिण्यां द्वारशाखावरोपणम् ॥ " इति ज्योतिर्निबंधेऽभिहितत्वात्तिथयोपितत्रैवाभिहिताः । " पंचमी धनदाचैवमुनिनंदवसौ शुभम् । प्रतिपत्सुनकर्तव्यंकृतेदुःखमवाप्नुयात् ॥ द्वितीयायांद्रव्यहानिः पशुपुत्रविनाशनम् । तृतीयारोगदाज्ञेयाच तुर्थी भंगकारिणी ॥ कुलक्षयं तथाषष्ठीदशमीधननाशिनी । विरोधकृदमा पूर्णान स्याच्छाखावरोपणम् ॥ " इति । एवंसतिविरुद्धतिथिंविहायविहिततिथिषुविहितभेषुचतत्रापिचक्रशुद्धेषुद्वारंविहितं शुभफलदातृस्यादितिनिष्कृष्टोर्थइतिशिवम् ॥ २९ ॥ अथगृहारंभप्रकरणंगद्येनोपसंहरति ॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचितेमुहूर्तचिंतामणौगृहनिर्माणप्रकरणम् ॥ स्पष्टार्थमेतत् ॥ ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तथापुत्रेणाहिगवीप्रसारितधियामौहूर्तचिंतामणेः ॥ गोविंदेनविनिर्मितेनयनिधौपीयूषधाराभिधेव्याख्यानेगृहनिर्मितिप्रकरणंसंपूर्णतामध्यगात् ॥ १ ॥ इति श्रीविद्वद्दैवज्ञमुकुटालंकारनीलकंठज्योतिर्वित्पुत्रगोविंदज्योतिर्विद्विरचितायांमुहूर्त्तचिंतामणिटीकायांपीयूषधारायांवास्तुप्रकरणंसमाप्तम् ॥ १२ ॥

॥ इति वास्तुप्रकरणम् ॥ १२ ॥

---

१ अत्र संदेहः—किं चरण एव स्खलितोवेति ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

अथ गृहप्रवेशप्रकरणम् १३

सौम्यायने ज्येष्ठतपोंत्यमाधवे यात्रानिवृत्तौ नृपते-
र्नवे गृहे ॥ स्याद्वेशनंद्वाःस्थमृदुध्रुवोडुभिर्जन्मर्क्षल-

श्रीगणेशायनमः ॥ लंबोदरंनमस्कृत्यगोविंदेनविदांमुदे ॥ गृहवेशप्रकरणंसम्यग्व्याख्यायतेंऽतिमम् ॥ १ ॥ अथगृहप्रवेशप्रकरणंव्याख्यायते । तत्रचतुर्धाप्रवेशइत्युक्तंप्रागस्माभिः । तत्रनववधूप्रवेशोविवाहप्रकरणांतेऽभिहितः । अन्यप्रवेशत्रयमुहूर्तोत्राभिधीयते । ननु 'यात्रानिवृत्तौशुभदंप्रवेशनम्' इत्यादिनासुपूर्वप्रवेशस्याभिहितत्वात्प्रवेशद्वयमेववक्तव्यंस्यान्नतुप्रवेशत्रयमिति । उच्यते । यात्रांकृत्वाप्रतिनिवृत्तस्यभूपादेरासुमुहूर्तंनगराद्बहिःस्थातुमशक्नुवतोदैवादागतवृष्ट्याद्यभिभूतस्य यथाकथंचिच्छुभाशुभप्रकरणोक्तां पंचांगशुद्धिंविचार्योक्तयथाविहितनक्षत्रैरेवप्रशस्तःप्रवेशोभिहितः नतुविशिष्यतादृशेप्रवेशेकालशुद्धिर्वोक्तेत्यतःसुपूर्वस्याभिधानं । तत्रापूर्वप्रवेशसुपूर्वप्रवेशयोःकालशुद्ध्यादिकमिंद्रवंशाछंदसाह ॥ सौम्यायने इति ॥ एतेषुसौम्यायनइत्यादिकेषुपदार्थेषुसत्सुनृपतेर्यात्रानिवृत्तौ अथवानवेनूतनोत्थापितेगृहेवेशनं 'विशप्रवेशने' प्रवेशनंस्यात् । सौम्यायनेउत्तरायणे । अत्रशुक्रगुर्वस्तादिकोदोषो 'वाप्यारामतडाग' इत्यादिनोक्तइतिनपुनरुक्तः । एवं 'गीर्वाणांबुप्रतिष्ठा' इत्यादिनादक्षिणायननिषेधोपिअतःपरिशेषात्सौम्यायनग्रहणेसिद्धेतदुक्तिर्मंदबुद्धीनांशीघ्रप्रतिपत्त्यर्था । उक्तंचवसिष्ठेन "अथप्रवेशोनवसद्मनश्चसौम्यायनेजीवसितेवलाढ्ये" इति । बलाढ्येउदिते । नारदेनापि "अथसौम्यायनेकार्यंनववेश्मप्रवेशनं।राज्ञांयात्रानिवृत्तौ"इति। केवलायांभूमौक्रीतायांप्राप्तायांवास्वतःसिद्धायांवोत्थापितंगृहंनूतनमित्युच्यते । ज्येष्ठेति । माघफाल्गुनवैशाखमासेष्वेवसत्यप्युत्तरायणेप्रवेशनंशुभं । यदाहनारदः "माघफाल्गुनवैशाखज्येष्ठमासेषुशोभनः । प्रवेशोमध्यमोज्ञेयःसौम्यकार्तिकमासयोः ॥" इति। सौम्यो मार्गशीर्षः । मध्यमोक्तिरावश्यकविषया । चांद्रमासफलान्याहवसिष्ठः "माघेऽर्थलाभःप्रथमप्रवेशेपुत्रार्थलाभःखलुफाल्गुनेच । चैत्रेर्थहानिर्धनधान्यलाभोवैशाखमासेपशुपुत्रलाभः ॥ ज्येष्ठेचमासेषुपरेषुनूनंहानिप्रदःशत्रुभयप्रदश्च । शुक्लेचपक्षेसुतरांविवृद्ध्यै कृष्णेचयावद्दशमीचतावत् । " इत्याद्युक्तेरेवग्रंथकृतापक्षविशुद्धिर्नोक्ता । तिथिवारशुद्धिश्चाग्रेवक्ष्यते । वसिष्ठेनतुगृहप्रवेशेसौरमानमनूद्यदूषितम् । यथा "मृगादिषड्राशिषुसंस्थितेर्केनवप्रवेशःशुभदःसदैव । कुंभंविनान्येष्वपिकेचिदूचुर्नसौरामिष्टंखलुसन्निवेशे ॥ " इति । अस्यार्थः । नूतनगृहप्रवेशोमकरादिषड्राशिसंस्थिते सूर्येशुभफलदोभवति तत्रापिमाघादिषुवि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

हितेषुचतुर्षुमासेषुशुभः । ननु ' अथप्रवेशोनवसद्मनश्चसौम्यायने ' इतिस्वयंप्राक्सौम्यायनइत्युक्तत्वात्किमित्येतत्पुनरुक्तमित्यतआह ॥ कुंभंविनेति । सत्यप्युत्तरायणेकुंभसंक्रांतौनूतनगृहप्रवेशोनभवतीत्येतदर्थंपुनरुक्तमित्यर्थः।नन्विदंपूर्वापरविरुद्धं । तथाहि 'माघेऽर्थलाभःप्रथमप्रवेश'इत्यादिनामाघफाल्गुनयोश्चांद्रमासयोः शुभफलाभिधानात्तत्रैवचकुंभसंक्रांतिसद्भावाद्द्वयोरन्यतरस्याशुभत्वंप्रतिपाद्यते । उभयमासनिर्मुक्तःकुंभस्तु नास्त्येवेतिचेत् । उच्यते । संति हिद्विविधामासाश्चांद्रमासाःशुक्लादयःकृष्णादयश्चेति । तत्रफाल्गुनपूर्णिमोत्तरमासस्यकृष्णादिमासगणनयाचैत्रत्वात्तस्यचविरुद्धफलत्वात्तद्विषयकोऽयंकुंभसंक्रांतिनिषेधः । चांद्रमासस्यशुक्लादिकृष्णाद्यभिधायकानिवाक्यानिगृहारंभप्रकरणेऽस्माभिरुक्तानि । अयमपिनिषेधोमासस्यकृष्णादित्वेज्ञापकः । अथकर्कादिसंक्रांतिषुमतांतरमाह । अन्येष्वपीति । केचिदाचार्याअन्येष्वपिकर्कादिषड्राशिस्थितेसूर्येपि नवगृहप्रवेशः कार्यइत्यूचुः । तदेतद्द्वंद्वसौपूर्विकगृहप्रवेशविषयं । तदुक्तंस्वयमेव 'नवप्रवेशेत्वथकालशुद्धिर्नद्वंद्वसौपूर्विकयोःकदाचित्'इति । नूतनतृणागारप्रवेशविषयंवा । तदुक्तंज्योतिःप्रकाशे "गृहारंभोदितैर्मासैर्धिष्ण्यैर्वारैर्विशेद्गृहं । विशेत्सौम्यायनेहर्म्यंतृणागारंतुसर्वदा ॥" इति । अतएव " कुलीरकन्यकाकुंभेदिनेशेनविशेद्गृहम् । ग्रामंवानगरंवापिपत्तनंवासुराधिप "इतिगुरुवाक्यमप्येवमेवव्याख्येयं । ननुपौषचैत्रादिषुविरुद्धफलेषुचांद्रमासेषुविहितसंक्रांतिश्चेत्तदानूतनगृहप्रवेशः कार्योवानवेत्यत आह । नसौरमिति । खलुनिश्चयेनसौरंमानंसन्निवेशेगृहप्रवेशेनेष्टंनशुभफलदं । विरुद्धशुभफलयोश्चांद्रसौरमासयोःसाहित्येविहितचांद्रमासैरेवगृहप्रवेशःकार्यइत्यलमतिप्रसंगेन । द्वाःस्थेति । द्वारनक्षत्राणि ' भानिस्थाप्यान्यब्धिदिक्षुव'इत्यादिनोक्तानि मृदूनिध्रुवाणिचोडूनिप्रसिद्धानि । द्वाःस्थानिचतानिमृदुध्रुवोडूनिचेति कर्मधारयः । तादृशैर्भैःप्रवेशनंहितंस्यात् । अयमर्थः । यस्मिन्गृहेप्रवेशःकर्तुमिष्यतेतस्यद्वारंयद्दिगभिमुखंतद्दिङ्नक्षत्रैर्विहितैःप्रवेशःकार्यः।यदाहवसिष्ठः "यद्दिग्द्वारंमंदिरंतद्दिगृक्षैरुक्तर्क्षैःस्यात्संप्रवेशोनसर्वैः" ॥ इति । उक्तर्क्षाण्याहसएव "चित्रोत्तराधातृशशांकमित्रवस्वंत्यवारीश्वरभेषु नूनं । आयुर्धनारोग्यसुपुत्रपौत्रसत्कीर्तिदः स्यात्त्रिविधःप्रवेशः ॥ "इति । नारदोपि "वस्वीज्यांत्येषुवरुणत्वाष्ट्रमित्रस्थिरोडुषु । शुभःप्रवेशोदेवेज्यशुक्रयोर्दृश्यमानयोः ॥" इति । अत्रपुष्यधनिष्ठाशततारकाग्रहणंजीर्णगृहप्रवेशविषयम् । उक्तंचज्योतिःप्रकाशे "प्रवेशोनूतनेहर्म्येध्रुवैर्मैत्रैःसुखाप्तये।पुष्यस्वातीयुतैस्तैश्चजीर्णे स्याद्वासवद्वये ॥"इति । एतद्ग्रंथकृदप्यग्रिमपद्येवक्ष्यति।अमुमेवाशयंमनसिनिधायाहश्रीपतिः " शुभःप्रवेशोमृदुभिर्ध्रुवाख्यैःक्षिप्रैश्चरैःस्यात्पुनरेवयात्रा।उग्रैर्नृपोदारुणभैःकुमारो राज्ञीविशाखासुविनाशमेति॥कृत्तिकासुभवनंकृशानुनादह्यतेप्रविशतांनसंशयः। यन्मुखंचसदनंहितत्ककुब्द्वारभेषुशुभकृत्प्रवेशनम्॥"इति।वसिष्ठोपि "अर्कानिलेयादितिदस्रविष्णुऋक्षेप्रविष्टंनवमंदिरंयत् । अब्दत्रयात्तत्परहस्तयातंशेषेषुधिष्ण्येषुचमृत्युदंस्यात् ॥"इति । प्रवेशलग्नान्या

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ग्रोपचयोदये स्थिरे ॥ १ ॥ जीर्णेगृहेऽग्न्यादिभयान्नवे-
ऽपि मार्गोर्जयोः श्रावणिकेऽपि सन्स्यात् ॥ वेशोंबु-

ह ॥ जन्मर्क्षेति ॥ जन्मर्क्षंजन्मराशिःजन्मलग्नंप्रसिद्धं ताभ्यामुपचयेतृतीयषष्ठैकादश दशमस्थेऽन्येषुतथास्थिराख्यराशिषुलग्नगतेषुसत्सुनवगृहप्रवेशनंशुभं । यदाहवसिष्ठः "कर्त्तुर्विलग्नादथजन्मराशेर्लग्नस्थितोराशिरितिप्रदिष्टः । निर्व्याधिदारिद्र्ययशस्कराश्च सुहृत्सुतघ्नोरिपुनाशतश्च ॥ कलत्रहंतानिधनप्रदश्चरोगप्रदःसिद्धिकरोऽर्थदश्च । क्रमाच्चवैरामयदःक्रमेणसदैवनूनंत्रिविधःप्रवेशः ॥"इति । अतोनिष्कृष्टमर्थमाहगृहप्रवेशेराजमार्त्तण्डः "कर्तृभोपचयगाश्चविलग्नेराशयःशुभफलायभवंति ।"इति । नारदोपि "कर्तुर्जन्मभलग्नेवाताभ्यामुपचयेपिवा । प्रवेशलग्नेस्याद्वृद्धिरन्यभेशोकनिःस्वनः ॥" इति । पुनर्वसिष्ठः "सौम्येस्थिरेभेशुभदृष्टियुक्तेलग्नेऽथवाद्यंगगृहेविलग्ने ॥"इति । सौम्येसौम्यगृहयुक्तेद्यंगगृहेद्विस्वभावराशौ । अत्रविवाहप्रकरणोक्ताएकविंशतिमहादोषा वर्ज्या इत्यपिध्येयम् । एकविंशतिदोषानुपक्रम्यवसिष्ठेनोक्तं "कर्त्तुर्नाशोगृहारंभेप्रवेशे पतिनाशनम् ॥"इति ॥ १ ॥ अथजीर्णगृहादिविषयकप्रवेशविशेषमिंद्रवज्राछंदसाह ॥ जीर्णेइति ॥ जीर्णेपुरातनेऽन्यनिर्मितेगृहेऽथवासिद्धेएवगृहेऽग्न्यादिभयादग्निकृतं भयं दाहः आदिशब्देन बहुवृष्टिपातभयंराजकोपोवा इत्याद्युपद्रवैःपतितेगृहेपुनरपिसम्यग् नवेकृतेउत्थापितेगृहेपिप्राक्पद्योक्ताः सर्वेपिमासास्तादृशगृहप्रवेशेध्येयाः । किंच मार्गोर्जयोःमार्गशीर्षकार्तिकयोश्चश्रावणिकेपिश्रावणेमासिवेशःप्रवेशःसन् शुभफलदः स्यात् । 'श्रावणेतुस्यान्नभाःश्रावणिकश्चसः' इत्यमरः । यदाहसनत्कुमारः "गृहारंभोदितैर्मासैर्धिष्ण्यैर्वारैर्विशेद्गृहम् ॥" इति । अत्रसामान्यतोगृहारंभोदितामासागृहप्रवेशेभिहितास्तेचेमे "सौम्यफाल्गुनवैशाखमासश्रावणकार्तिकाः । मासाःस्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाः ॥" इतिनारदोक्ताःमार्गशीर्षफाल्गुनवैशाखमाघश्रावणकार्तिकाविहिताः । तत्रउत्तरायणेएवगृहप्रवेशस्यवाक्यांतरेणविहितत्वात् । श्रावणकार्त्तिकमार्गशीर्षाणामुत्तरायणत्वाभावाद्विरोधेननूतनजीर्णगृहप्रवेशाभ्यांव्यवस्था कथं । प्रागभिहितनारदवाक्येनोत्तरायणसाहचर्येणनूतनगृहप्रवेशसुपूर्वगृहप्रवेशयोर्विधानात् । 'गृहारंभोदितैर्मासैः' इत्यनेनतुसामान्यतस्त्रिविधस्यापिगृहप्रवेशस्याभिधानादुत्तरायणीयामासास्त्रिविधगृहप्रवेशेशुभाः । दक्षिणायनीयामासाःश्रावणादयस्तुजीर्णगृहप्रवेशविषयाः । अतएवनारदोमार्गशीर्षकार्तिकयोर्नूतनगृहप्रवेशेमध्यमत्वमाह । अर्थादेवजीर्णगृहप्रवेशेउत्कृष्टत्वमध्यवस्यते । अंबुपेति । अंबुपःशततारकाइज्यःपुष्यः अनिलःस्वाती वासवंधनिष्ठा एष्वपिभेषुजीर्णेगृहेऽग्न्यादिभयान्नवेपिगृहेप्रवेशःशुभः । प्राक्पद्योक्तेषुशुभएवेतिकैमुतिकन्यायादवगम्यते । यदुक्तं ज्योतिःप्रकाशे "प्रवेशोनूतनेहर्म्येध्रुवैर्मैत्रैःसुखाप्तये । पुष्येस्वातियुतैस्तैश्चजीर्णे स्याद्वासद्वये॥"

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पेज्यानिलवासवेषु नावश्यमस्तादिविचारणाऽत्र ॥२॥
मृदुध्रुवक्षिप्रचरेषु मूलभे वास्त्वर्चनं भूतबलिं च का-

इति । नावश्यमिति । अत्रैवंविधेजीर्णेगृहेअग्न्यादिभयान्नवेपिगृहेऽवश्यमस्तादिविचारणा शुक्रास्तगुर्वस्तबाल्यवार्द्धकसिंहस्थगुरुमकरस्थगुरुलुप्तसंवत्सरादीनांदोषाणांविचारणा विचारोनास्ति । अस्तादयः कालदोषाःसंतुवामावातथापिगृहप्रवेशःकार्यः । परंतुसोपि यथाकथंचित्पंचांगशुद्धिमात्रमंगीकृत्यविहितनक्षत्रेष्वेवकार्यः।वास्तुपूजात्वेवंविधेपिगृहप्र वेशेभवतीत्यपिध्येयम्।यदुक्तंज्योतिःप्रकाशे"नित्ययानेगृहेजीर्णेप्राशनेपरिधानके ।वधूप्र वेशेमांगल्येनमौढ्यंगुरुशुक्रयोः॥"इति। वसिष्ठेनाप्युक्तं"नवप्रवेशेत्वथकालशुद्धिर्नद्वंद्वसौ पूर्विकयोःकदाचित्॥"इति।अस्यार्थः नूतनगृहप्रवेशेकालशुद्धिर्विचार्या।द्वंद्वंद्वंद्वाभयाख्यो गृहप्रवेशः सौपूर्विकोराज्ञोयात्रासमाप्तौगृहप्रवेशः तादृशयोर्गृहप्रवेशयोः कालशुद्धिःकदा चिदपिनापेक्षिता।सतिसंभवेसुखेनास्तुकिंतुप्रवेशदिनीयपंचांगशुद्धिसहितेसुलग्नेगृहप्रवेशः कार्यः।पूर्वस्मिन्नाद्यनूतनेप्रवेशेयथावास्तुपूजातथाद्वंद्वसौपूर्विकयोरपिकार्येत्यर्थः । नारद स्तुयात्रानिवृत्तिप्रवेशे कालशुद्धिरपेक्षितैवेत्याह।तद्वाक्यंप्रागभिहितं।तदेतयोर्वाक्ययोराव श्यकानावश्यकत्वेनव्यवस्था।त्रयाणां गृहप्रवेशानांलक्षणमुक्तंवसिष्ठेन"अपूर्वसंज्ञःप्रथमः प्रवेशोयात्रावसानेतुसुपूर्वसंज्ञः । द्वंद्वाभयस्त्वग्निभयादिजातःप्रवेशएवंत्रिविधःप्रदिष्टः॥" इति । एतद्व्याख्यानंयात्रानिवृत्ताविति पद्यव्याकृतावस्तितत्ततएवावधार्यम् । अत्रे दंध्येयं । यत्रिविधेपिप्रवेशेप्रवेशदिनीयनक्षत्रंक्रूराक्रांतंक्रूरविद्धंवातत्सर्वथावर्ज्यमिति । उक्तंचवसिष्ठेन "क्रूरग्रहाधिष्ठितविद्धभंचविवर्जनीयंत्रिविधप्रवेशे ॥" इति ॥ २ ॥ अथगृहप्रवेशदिनात्प्राक्कर्तव्यांवास्तुपूजांविवक्षुस्तन्नक्षत्राण्युपजातिकापूर्वार्धेनाह॥मृद्विति। मृदूनिध्रुवाणिक्षिप्राणिचराणि नक्षत्राणिप्रसिद्धानिमूलभंच एषुसप्तदशसुभेषुनक्षत्रेषु वास्तोःवास्तुपुरुषस्यार्चनंभूतबलिंचकारयेत् । गृहपतिर्वास्तुपूजांकुर्यात् पुरोहितोगृहप तिंवास्तुपूजादिकंकारयेत् "हृक्रोरन्यतरस्याम्" इत्यणौकर्त्तुःकर्मत्वं । यदाहऋक्षोच्चयः "चित्राशतभिषास्वातीहस्तःपुष्यः पुनर्वसुः । रोहिणीरेवतीमूलंश्रवणोत्तरफाल्गुनी ॥ धनिष्ठाचोत्तराषाढातथाभाद्रोत्तरान्विता । अश्विनीमृगशीर्षंचअनुराधातथैवच ॥ वास्तु पूजनमेतेषुनक्षत्रेषुकरोतियः ॥ सप्राप्नोतिनरोलक्ष्मीमितिप्राहपराशरः ॥" इति । वास्तुपूजाप्रकारमाहवसिष्ठः "निर्माणेमंदिराणांचप्रवेशेत्रिविधेपिवा । वास्तुपूजातु कर्त्तव्यायस्मात्तां कथयाम्यतः ॥ गृहमध्येहस्तमात्रंसमंतात्तंडुलोपरि । एकाशीतिपदंकार्यंतिलैस्तुल्यंसुशोभनम् ॥ एकद्वित्रिपदाः पंचचत्वारिंशत्सुरा र्चिताः । द्वात्रिंशद्बाह्यतोवक्ष्यमाणाश्चांतस्त्रयोदश ॥ तेषांस्थानानिनामानिवक्ष्यामीश्व रकोणतः । तत्राग्निःशंभुकोणस्थस्त्वसौचैकपदेश्वरः ॥ तस्माद्द्वितीयःपर्जन्यश्चासावेक पदेश्वरः । जयंतेंद्रार्कसत्याख्याभृशश्चद्विपदेश्वराः ॥ आकाशवायूपरतःक्रमादेकपदे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

रयेत् ॥ त्रिकोणकेंद्रायधनत्रिगैः शुभैर्लग्ने त्रिषष्ठायग-

श्वरौ । एवंप्राच्यांनवज्ञात्वात्वेवमेवान्यादिक्षुच ॥ आद्याश्चांत्यावेकपदौद्विपदाःपंचम ध्यगाः । पूषाद्यष्टौयमांताःस्युरमरायाम्यभागगाः ॥ आद्याश्चांत्यावेकपदौद्विपदाःपंचम ध्यगाः । अष्टौपितृगणाधीशाःपापांताःपश्चिमेश्वराः ॥ आद्यंतौद्वावेकपदौद्विपदाःपंचम ध्यगाः । रोगादिदित्यंतसुराःसप्तसौम्यदिशिक्रमात् ॥ तत्राधःस्थश्चतुष्कोणेष्वीशाना दिषुचक्रमात् । आपःसावित्रविजयरुद्राश्चैकपदेश्वराः ॥ मध्येनवपदोब्रह्मा तस्यैशा नादिकोणगाः । आपवत्सोथसवितावितावुधाधिपसंज्ञकः ॥ राजयक्ष्माचचत्वारःसुराश्चैक पदेश्वराः । ब्रह्मणःपूर्वतोदिक्षुत्रिपदाश्चामराअमी ॥ अर्यमाचविवस्वांश्चमित्रःपितृधरः क्रमात् । स्वस्वस्थलेषुदेवेषुस्थापितेष्वीदृशंभवेत् ॥ कोणेषुपंचपंचैवचतुर्थैकपदाःसुराः । प्रागादिदिक्षुद्विपदाःपंचपंचयथाक्रमम् ॥ ब्रह्मणःपूर्वतोदिक्षुत्रिपदाःस्युःसमीपगाः । हिरण्यरेताःपर्जन्योजयंतःपाकशासनः ॥ सूर्यःसत्योभृशाकाशौवायुःपूषाचवैतथा । गृहक्षतःपितृपतिर्गंधर्वोभृंगराजकः ॥ मृगःपितृगणाधीशस्तथादौवारिकाह्वयः । सुग्री वःपुष्पदंतश्चजलाधीशोनिशाचरः ॥ शोषःपापाश्चरोगोहिर्मुखोभल्लाटएवच । सोमस र्पौ दित्यदितीद्वात्रिंशदमराःस्मृताः ॥ आपश्चैवापवत्सश्चजयोरंध्रस्तथैवच । मध्येनव पदेब्रह्मातस्यौतस्यसमीपगः ॥ प्राच्यांह्यंतरितादेवाःपरितोब्रह्मणःस्मृताः । अर्यमासवि ताचैवविवस्वान्विबुधाधिपः॥मित्रोऽथराजयक्ष्माचतथापृथ्वीधरःक्रमात् । आपवत्सोष्टमः पंचचत्वारिंशत्सुरोत्तमाः ॥ ज्ञात्वैवंस्थाननामानिब्रह्मणासहितान्न्यसेत् । वास्तुज्ञो वास्तुमंत्रेणगंधपुष्पाक्षतादिभिः ॥ प्रणवेनार्चयेद्वापिअथवास्वस्वनामभिः । शु क्लवस्त्रयुगंदद्याद्धूपदीपफलैःसह ॥ अपूपैर्भूरिनैवेद्यैर्वाद्यैःसहसमर्चयेत् । तांबूलंचततो दद्याद्देवेभ्यश्चपृथक्पृथक् ॥ दत्त्वापुष्पांजलिंकर्तांप्रार्थयेद्वास्तुपूरुषं । वास्तुपुरुष नमस्तेस्तुभूमिशय्यारतप्रभो ॥ मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदा । इतिप्रार्थ्य ततोदद्याद्दक्षिणामर्चकायच । विप्रेभ्योभोजनंदत्त्वास्वयंभुंजीतबंधुभिः । एवंयःकुरुतेस म्यग्वास्तुपूजांप्रयत्नतः ॥ आरोग्यंपुत्रपौत्रादि धनधान्यंलभेन्नरः । वास्तुपूजामकृ त्वायःप्रविशेन्नवमंदिरे ॥ रोगान्नानाविधान्क्लेशानश्नुतेसर्वसंकटम् ॥" इतिवसिष्ठसंहिता यांवास्तुशांतिः ॥ विशेषस्त्वन्यसंहिताभ्योऽवसेयः । एवंभूतबलिरपि । उपक्रमोपसंहा ररूपोवास्तुशांतिप्रकारःप्रयोगरत्नादिनाम्नीषुस्वस्वशाखाभेदेनभिन्नासुपद्धतिषुद्रष्टव्यः । ग्रंथविस्तरभयान्नेहलिख्यतइत्यलमतिप्रसंगेन । केचित्तुपंचांगशुद्धिमात्रयुक्तेपूर्वदिनए ववास्तुपूजामाहुः । यदाहनारदः " विधायपूर्वदिवसेवास्तुपूजाबलिक्रियाम् ॥" इति । श्रीपतिरपि "अथप्रवेशोनवमंदिरस्ययात्रानिवृत्तावथभूपतीनां । सौम्यायनेपूर्वदिनेवि धायवास्त्वर्चनंभूतबलिंचसम्यक् ॥" इति ॥२॥ अथलग्नशुद्धितिथिशुद्धिंचोपजातिको त्तरार्धेनेंद्रवज्रयाचाह ॥ त्रिकोणेइति ॥ शुद्धेति ॥ नवमपंचमचतुर्थसप्तमदशमैकादश

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

तैश्च पापकैः ॥ ३ ॥ शुद्धांबुरंध्रे विजनुर्भमृत्यौ व्यर्का-

द्वितीयतृतीयस्थानानामन्यतमस्थानस्थैः शुभग्रहैरुपलक्षितेपूर्णचंद्रबुधगुरुशुक्रैरुपलक्षिते । अत्रचंद्रस्यलग्नराहित्येध्ययम् । तथातृतीयषष्ठैकादशस्थैःपापग्रहैरुपलक्षिते तथाअंबुचतुर्थस्थानंरंध्रमष्टमस्थानंशुद्धेसर्वग्रहरहितेअंबुरंध्रेयस्मिंस्तादृशेलग्नेवेश्मगृहमाविशेत् । यदाहवसिष्ठः "केंद्रत्रिकोणायधनत्रिसंस्थैःशुभैस्त्रिषष्ठायगतैःखलैश्च ॥ लग्नांत्यषष्ठाष्टमवर्जितेनचंद्रेणलक्ष्मीनिलयःप्रवेशः ॥ " इति । अन्यच्च "प्रवेशलग्नान्निधनस्थितोयःक्रूरग्रहःक्रूरगृहेयदिस्यात् । प्रवेशकर्तारमथ त्रिवर्षाद्धंत्यष्टवर्षैःशुभराशिगश्चेत् ॥ " इति । नारदः "स्थिरलग्ने स्थिरेराशौनैधनेशुद्धिसंयुते । त्रिकोणकेंद्रखत्र्यायसौम्यैस्त्र्यायारिगैः परैः ॥ लग्नांत्यार्यष्टमस्थानवर्जितेनहिमांशुना ॥ " इति । प्रवेशःस्यादितिपूर्वेणसंबंधः । गुरुः "सप्तमंशुद्धमुद्वाहेयात्रायामष्टमंतथा । दशमंचगृहारंभेचतुर्थसंनिवेशने ॥" इति । यत्तुश्रीपतिना "केंद्राच्छिद्रव्ययैःशुद्धैःक्रूरैःषट्त्र्यायगैर्गुरौ । लग्नेभृगौवाकेंद्रेवास्थिरग्राम्योदयेविशेत् ॥ " इति । केंद्रस्यशुद्धत्वमुक्तंतत्पापग्रहराहित्यकृतंध्येयम् । लग्नस्थगुरुभृग्वोरुक्तिस्त्वतिप्राशस्त्याभिधानार्था । कीदृशेलग्ने विजनुर्भमृत्यौभंराशिर्लग्नंचजनुषिजन्मकालेभेजनुर्भेताभ्यांमृत्युरष्टमभवनंजनुर्भमृत्युःविगतोजनुर्भमृत्युर्यस्मिन्स्वजन्मलग्नात्स्वजन्मराशेर्वाष्टमोराशिःप्रवेशलग्नंतोनापेक्षितइत्यर्थः । पुनःकीदृशेव्यर्काररिक्ताचरदर्शचैत्रेअर्कारौप्रसिद्धौवारौरिक्ता ४।९। १४ उपलक्षणत्वाद्दग्धतिथयोपिचरलग्नानिमेषकर्कतुलामकराः उपलक्षणत्वात्तदंशाअपिदर्शोमावास्याचैत्रोमासः । उपलक्षणत्वादाषाढोपि । विगताअर्कादयोयस्मिन्अर्कादयः प्रवेशदिनेनिषिद्धाइत्यर्थः । यदाह वसिष्ठः "ननैधनेभेपिनचाष्टलग्नेपंचेष्टकेप्यष्टमशुद्धियुक्ते । कार्यः प्रवेशोनचरांशलग्नेशुभेक्षितेवाप्यथसंयुतेवा ॥ रिक्ताममांदग्धतिथिंदिनेशभूसूनुषड्वर्गमिनेंदुदृष्टिम् । क्रूरग्रहाधिष्ठितविद्धभंचविवर्जनीयंत्रिविधप्रवेशे ॥" इति । वारफलमप्याहसएव " दह्यतेप्रविशतांचमंदिरंवह्निनानियतमेववह्निभे । ब्रध्नभूमिसुतवासरेतथाशीतरश्मिदिवसेहिवृद्धिदं ॥ चंद्रजार्यसितवासरेषुचश्रीकरंसुखमहार्थलाभदं । सूर्यसूनुदिवसेस्थिरप्रदंकिंतुचौरभयमत्रविद्यते ॥ " इति । एषांनिष्कृष्टमर्थमाह श्रीपतिः " रिक्तातिथिभूसुतभानुवारौनिंद्याश्चयोगाःपरिवर्जनीयाः । मेषःकुलीरोमकरस्तुलाचत्याज्याः प्रवेशेहितथास्तदंशाः ॥ " इति । निषिद्धलग्नफलान्यभिहितानि राजमार्त्तंडे "भूपोयात्रामेषलग्नेप्रवेशेनाशंगच्छेत्कर्कटस्योदयेवा । व्याधिंतौलिन्याश्रितेलग्नवर्तिन्याकेकेरेचाप्युयाद्धान्यनाशम् ॥ " आकेकेरेमकरे "लग्नेन्यत्रांशकेप्येषामेतद्दुष्टफलप्रदाः । शुभान्यन्यानिलग्नानिप्रवेशेमुनयोविदुः । " इति । अन्यानिस्थिराणिद्विस्वभावानिच । उक्तंच वसिष्ठेन " पंचांगसंशुद्धदिनेनिशेशताराबलेचाष्टकवर्गयुक्ते । सौम्येस्थिरेभेशुभदृष्टियुक्तेलग्नेऽथवाद्यंगगृहेविलग्ने ॥ " इति । विशेषो राजमार्त्तंडे " निंदिताअपिशुभांशसमेतास्तौलिमेषमकराः सकुलीराः । कर्तृभोपचयगाश्चविलग्नेराशयः शुभफलायभवंति ॥ "

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

रिक्ताचरदर्शचैत्रे ॥ अग्रेंबुपूर्णकलशंद्विजांश्च कृत्वा विशेद्वेश्म भकूटशुद्धम् ॥ ४ ॥ वामो रविर्मृत्युसुतार्थ-लाभतोऽर्के पंचभे प्राग्वदनादिमंदिरे ॥ पूर्णातिथौ

इति । एतल्लग्नांतराशुद्धौबहुकालासहिष्णुत्वेवाद्रष्टव्यं । शुभांशाःवृषमिथुनकन्याधनुमीनानामंशाइत्यर्थः । कर्केतुलांशस्थेस्वरूपतोनिषिद्धत्वाद्विशेषांतरमाह वसिष्ठः " यः क्षीणचंद्रोऽत्यषडष्टसंस्थः पापेक्षितः पापयुतोऽथवास्यात् । कर्तुःस्त्रियंहंतिसवत्सरेणत्रिवर्षतः सौम्यनिरीक्षितश्चेत् ॥ " इति । अथराज्ञांयात्रानिवृत्तिप्रवेशोनिषिद्धोस्ति। यदाहगुरुः "निर्गमान्नवमेमासिप्रवेशोनैवशोभनः । नवमेदिवसेचैवप्रवेशंनैवकारयेत् ॥" इति । वामंरविमिति । गृहप्रवेशसमयेरविंसूर्यंवामंयद्दिगभिमुखान्प्रवेश्यगृहाद्वामभागस्थंकृत्वावेश्मगृहंविशेत्तथापुरोग्रेस्वसंमुखंपूर्णघटंजलपूर्णकलशमुपलक्षणत्वात्पूगीफलादिपूर्णघटंवाकृत्वाचकारस्यानुक्तसमुच्चयार्थत्वाद्ब्राह्मणांश्चसजलकलशानपि ब्राह्मणान्वाग्रेकृत्वावेश्मविशेत् । अत्रशुक्रःपृष्ठगःकार्यइत्यनुक्तोपिविशेषोध्येयः। यदाह वसिष्ठः "कृत्वाशुक्रंपृष्ठतोवामतोऽर्कंविप्रान्पूज्यानग्रतःपूर्णकुंभांहर्म्यंरम्यंतोरणस्रग्वितानैःस्त्रीभिःस्रग्वीगीतमाल्यैर्विशेत्तत् ॥" इति । गुरुस्तु वामगोऽग्रगोवाशुक्रोनिषिद्धः किंतुपृष्ठगतोदक्षिणगतोवाशुभइत्याह । "पृष्ठगंदक्षिणंवापिभृगुंकृत्वा विशेत्सदा । पुरोगंवामगंवापिशुक्रंकृत्वाविशेच्चन ॥"इति । अत्र शुक्रस्यदिक्चतुष्टयस्थत्वज्ञानंचंद्रवदेवज्ञेयंविशेषानुक्तेः । तच्चगृहारंभप्रकरणेऽस्माभिरुक्तम् । अयंचसर्ववर्णानांत्रिविधेऽपिप्रवेशोविधिः । राज्ञांतुयात्रानिवृत्तौविशेषमप्याह श्रीपतिः "कृत्वाविप्रान्सजलकलशांश्चाग्रतोवामतोऽर्कंस्नातः स्रग्वीविमलवसनोमंगलैर्वेदघोषैः । व्यस्तैर्यात्राकथितशकुनैर्द्वारमार्गेणराजाहर्म्यंपुष्पप्रकररुचिरंतोरणाढ्यंविशेच्च ॥ " इति । कीदृशंवेश्मभकूटशुद्धं भकूटंषष्ठाष्टकादितेनशुद्धम् उपलक्षणत्वाद्विवाहप्रकरणोक्तम् 'वर्णोवश्यंतथातारा ' इत्येवमादिकंचतेनापिशुद्धंध्येयं । यदाह वसिष्ठः " राशिकूटादिकंसर्वंदंपत्योरिवचिंतयेत् ।" इति ॥ ३॥४॥ अथवामगतार्कज्ञानंतिथिपरत्वेनपूर्वाद्यभिमुखगृहप्रवेशंचेंद्रवंशांछंदसाह ॥ वामइति ॥ अष्टमपंचमाद्वितीयैकादशस्थानेभ्यः पंचसुस्थानेषुस्थितेरवौसतिप्राग्वदनादिमंदिरेप्रवेष्टव्येगृहप्रवेशकर्तुर्वामोरविर्ज्ञेयः । तद्यथायस्मिन्लग्नेप्रवेशः कर्तुभिष्यतेतस्मादष्टमंयत्स्थानंतस्मात्पंचसुस्थानेषु अर्केस्थितेपूर्वाऽभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः स्यात् । तथालग्नाद्यत्पंचमंस्थानंततःपंचसुस्थानेषु अर्केस्थितेदक्षिणाऽभिमुखगृहप्रवेशकर्तुर्वामःसूर्यः । एवंलग्नाद्यद्वितीयंस्थानंततः पंचसुस्थानेषुस्थितेसूर्येपश्चिमाभिमुखगृहप्रवेशकर्तुर्वामःसूर्यः । तथैवलग्नाद्यदेकादशंस्थानंततः पंचसुस्थानेषुसूर्येस्थितेउत्तराभिमखगृहप्रवेशकर्तुर्वामःसूर्यइत्यर्थः । यथाचक्रोद्धारः । उक्तंच "रंध्रात्पुत्राद्धनादायात्पंच

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

प्राग्वदने गृहे शुभो नंदादिके याम्यजलोत्तरानने ॥ ५ ॥ वक्रे भूरविभात्प्रवेशसमये कुंभेग्निदाहः कृताः प्राच्यामुद्वसनं कृता यमगता लाभः कृताः प-

पूर्वमुखः	दक्षिणमुखः	पश्चिममुखः	उत्तरमुखः
सूर्यः ८	सूर्यः ५	सूर्यः २	सूर्यः ११
सू० ९	सू० ६	सू० ३	सू० १२
सू० १०	सू० ७	सू० ४	सू० १
सू० ११	सू० ८	सू० ५	सू० २
सू० १२	सू० ९	सू० ६	सू० ३

स्वर्केस्थितेक्रमात् । पूर्वाशादिमुखं गेहं विशेद्वामोभवेद्यतः ॥ " इति । विश्वकर्माऽपि " लग्नात्प्रागादितो दिक्षु द्वौद्वौराशीनियोजयेत् । एकमेकंन्यसेत्कोणेसूर्यवामेविचिंतयेत् ॥" इति । प्राच्यांलग्नात्द्वौराशीस्थाप्यौकोणेचैकः पूर्णातिथाविति प्राग्वदनेपूर्वाभिमुखेगृहेपूर्णातिथौपंचम्यांपूर्णिमायांवाप्रवेशः शुभः । नंदादिके तिथिगणे याम्यजलोत्तराननेगृहप्रवेशःशुभः । यथा दक्षिणाभिमुखे गृहेनंदायांप्रतिपदिषष्ठ्यामेकादश्यांवाप्रवेशः शुभः । जलंपश्चिमदिक्तद्दिगभिमुखेभद्रायांद्वितीयायांसप्तम्यांद्वादश्यांवाप्रवेशःशुभः । उत्तराभिमुखेगृहेजयायांतृतीयायामष्टम्यांत्रयोदश्यांवाप्रवेशः शुभइत्यर्थः । यदाह गुरुः " नंदायांदक्षिणद्वारंभद्रायांपश्चिमामुखं । जयायामुत्तरद्वारंपूर्णायांपूर्वतोविशेत् ॥ " इति । मूलेनंदादिकेइतिपदोपादानाद्रिक्तग्रहणंयथायातितथापिविदिक्षुद्वाराणांनिषेधाद्दिशांचचतुष्टयेन चतुर्णांद्वाराणांसंभवाच्चस्वरूपतोनिषेधाच्चरिक्ताग्रहणासंभवोध्येयः । सोपिसंमतिवाक्येस्पष्टएव ॥५॥ अथगृहप्रवेशेकलशवास्तुचक्रंशार्दूलविक्रीडितेनाह ॥ वक्रेइति ॥ कलशस्याऽष्टधाविभागाः परिकल्प्याः । मुखंकंठोगर्भोगुदंचेतिचत्वारोविभागाः भागाः पूर्वादिदिक्परत्वेनचत्वारोविभागाएवमष्टौस्युः । तत्रविभागपरत्वेनसूर्यभान्नक्षत्रन्यासेफलमुच्यते । वक्रेइति । गृहप्रवेशसमयेइतिसर्वत्रापिसंबध्यते । कुंभेकलशाकृतौवास्तुनिरविभात्सूर्याक्रांतनक्षत्रादितिल्यब्लोपेपंचमी । रविमारभ्यनक्षत्रन्यासइत्यर्थः । तत्रकलशस्यवक्रेमुखेभूरकेंसूर्याक्रांतनक्षत्रमेवस्थाप्यंतत्फलंगृहस्याऽग्निदाहः । ततःसूर्यभात्कृताअग्रिमाणिचत्वारिभानिप्राच्यांस्थाप्यानिफलमुद्वसनंजनवासशून्यंगृहंस्यात् । ततःकृतायमगतास्तदग्रिमाणिचत्वारि भानिदक्षिणस्यांयमदिशिस्थाप्यानिफलंगृहपतेर्लाभोद्रव्यप्राप्तिः । ततः कृताः पश्चिमेतदग्रिमाणिचत्वारिभानिपश्चिमायांस्थाप्यानिफलंगृहपतेः श्रीप्राप्तिः । ततो वेदाउत्तरेतदग्रिमाणिचत्वारिभानिउत्तरस्यांस्थाप्यानिफलंकलिर्लोकैःसहगृहसंबंधीनिरर्थकोझकटः स्यात् । ततोयुगमितास्ततोग्रिमाणिचत्वारिभानिगर्भेकलशमध्येस्थाप्यानिफलंविनाशः कस्येत्याकांक्षायांगर्भोपादानाद्भाविनांगर्भाणांविनाशइ

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्चिमे ॥ श्रीर्वेदाः कलिरुत्तरे युगमिता गर्भे विनाशो
गुदे रामाः स्थैर्यमतः स्थिरत्वमनलाः कंठे भवेत्सर्वदा
॥ ६ ॥ एवं सुलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुति-

त्यर्थः । ततोरामास्तदग्रिमाणित्रीणिभानिगुदेबुध्न्येस्थाप्यानिफलंस्थैर्यंगृहपतेर्ब
हुकालंतत्रगृहेनिवासः । ततोनलास्तदग्रिमाणित्रीणिभानिकंठेस्थाप्यानिफलं
स्थिरत्वंसर्वदागृहपतेर्भवेत् । एवमभिजिद्रहितानिसप्तविंशतिभानिस्युः । तदुक्तं
विश्वकर्मणा " घटाकारंलिखेच्चक्रंरविधिष्ण्यक्रमेणच । मुखैकंदिक्षुचत्वारित्रिस्त्रीणिगु
दकंठयोः ॥ एवंचक्रंसमालेख्यंप्रवेशार्थंसदाबुधैः " अत्रचत्वारिइतिवीप्साद्रष्टव्या ।
दिक्षुइत्यनेनगर्भोऽप्युपलक्ष्यते तथाचफलनिर्देशस्तत्रैव " अग्निनाशोमुखेप्रोक्तउद्वासः
पूर्वतोभवेत् । दक्षिणेचार्थलाभायपश्चिमेश्रीप्रदोभवेत् ॥ उत्तरेकलहश्चैवगर्भेगर्भविना
शनं । स्थिरताचगुदेकंठेकलशस्यप्रकीर्तिता ॥ इति । ज्योतिःप्रकाशेपि " भूर्वेदपंच
कंत्रिस्त्रिः १ । ४ । ४ । ४ । ४ । ४ । ३ । ३ । प्रवेशेकलशेऽर्कभात् । भृतिर्गति.
र्धनंश्रीः स्याद्वैरंशुकृस्थिरतासुखम् ॥ " इति । वेदपंचकंवेदाश्चत्वारस्तेषांपंचकंपंच
वारंचत्वारिभानिलेख्यानीत्यर्थः । भृतिरित्यादीन्यष्टौयथासंख्यंफलानि । अत्रकलश
चक्रेशुभफलदस्थानेयातेसत्येवविहितनक्षत्राणांपरिग्रहोयुक्तस्तत्रापियद्दिङ्मुखेप्रवेशेवि
धित्सितेतद्दिङ्मुखविहितनक्षत्रपरिग्रहः । यथापूर्वदिङ्मुखगृहप्रवेशेविधित्सितेरोहिणी
मृगेग्राह्ये । दक्षिणाभिमुखगृहप्रवेशेउत्तराफाल्गुनीचित्रे । एवंपश्चिमाभिमुखेअनुराधो
त्तराषाढेएवंउत्तराभिमुखेउत्तराभाद्रपदारेवत्यौग्राह्येइतिनिष्कृष्टोऽर्थः । अतएवोक्तं
वसिष्ठेन " यद्दिग्द्वारंमंदिरंतद्दिगर्क्षैरुक्तःस्यात्सासन्निवेशोनसर्वैः । " इति । तद्दिगर्क्षैरि
तिउक्तर्क्षैरितिचानयोः सामानाधिकरण्येनान्वयः । भिन्नवाक्यत्वेतुविवक्षितेचकारः
कर्त्तव्यः । ' संभवत्येकवाक्यत्वेवाक्यभेदोहिदूषणम् ' इति न्यायाच्च । अतएव "अ
र्कनिलयादितिदस्त्रविष्णुऋक्षेप्रविष्टंनवमंदिरंयत् । अब्दत्रयात्तत्परहस्तयातंशेषेषुधि
ष्ण्येषुचमृत्युदंस्यात् ॥ " इतिनिषेधोऽप्युपपन्नोभवति ॥ ६ ॥ अथगृहप्रवेशप्रकरणो
पसंहारंसूचयन्प्रवेशोत्तरकालीनकर्त्तव्यंविधिमुपजात्याह ॥ एवंसुलग्नेइति ॥ एवंप्रागु
क्तप्रकारेणविचारितेसुलग्नेनिर्दूषणे सकलगुणयुक्तेचशोभनलग्ने स्थिरराश्यादिकेराजा
वितानपुष्पश्रुतिघोषयुक्तंवितानानिवस्त्रमंडपाः पुष्पाणिस्वर्तुजातानिमालत्यादीनि
श्रुतिघोषोवेदध्वनिश्चतैर्युक्तमुपलक्षणत्वात्तोरणाद्यनेकमंगलवस्तुसहितमेतादृशंस्वगृहं
स्वसत्ताकंगृहंप्रविश्यशिल्पज्ञान्गृहोत्थापकान्स्थपतिवर्धक्यादीन्दैवज्ञान्ज्योतिर्विदः
विधिज्ञांस्तुपूजाभूतबलिगृहप्रवेशनीयविधिज्ञान्पुरोहितप्रभृतीन् पौरान्नागरिकान्पंडि
तदीनानाथांधकृपणांश्चभूमिहिरण्यवस्त्रैर्यथाशक्तिहिरण्येनवावस्त्रैर्वाव्यस्तैर्वासमुच्चितैर्वा
उपलक्षणत्वादश्वगजादिभिर्वाअर्चयेत्पूजयेत् । यदाहवसिष्ठः । " हर्म्यैरम्यंतोरणस्त्र

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

घोषयुक्तम् ॥ शिल्पज्ञदैवज्ञविधिज्ञपौरान्राजाऽर्चये-
द्भूमिहिरण्यवस्त्रैः ॥ ७ ॥ इतिमुहूर्तचिंतामणौ गृह-
प्रवेशप्रकरणम् ॥ १३ ॥ आसीद्धर्मपुरे षडंगनिगमा-
ध्येतृद्विजैर्मंडिते ज्योतिर्वित्तिलकः फणींद्ररचिते भा-

ग्वितानैः स्त्रीभिः स्रग्वीगीतवाद्यैर्विशेत्तत् । " इति । राजमार्तंडेपि "" भूरिपुष्पनिकरंसतोरणंतोयपूर्णकलशोपशोभितं । गंधपुष्पबलिपूजितामरंब्राह्मणध्वनियुतंविशेद्गृहम् ॥ " इति । कीदृशंगृहंप्रवेशयोग्यंनभवतीतिवसिष्ठेनाभ्यधायि । " यद्वास्तुपूजारहितंत्वदत्तबलित्वनाच्छन्नगृहंविरूपं । कपाटहीनंनविशेद्यतस्तत्सर्वापदामालयमेवतत्स्यात् ॥ " इति । नारदोपि " अकपाटमनाच्छन्नमदत्तबलिभोजनं । गृहंनप्रविशेद्धीमान्विपदामालयंहितत् ॥ " इति । तस्मात्सकपाटमुपरिष्टादाच्छादितंकृतवास्तुपूजंदत्तबलिएवगृहंप्रविशेत् । प्रवेशोत्तरकर्त्तव्यंविधिमाह श्रीपतिः "ततोनृपोविप्रसुहृत्पुरोधसः शिल्पज्ञभूगोलविदश्चलिंगिनः । धनैश्चरत्नैःपशुभिः समर्चयेत्सहांधदीनान्पुरवासिनस्तथा ॥ " इतिशिवम् ॥ ७ ॥ अथगृहप्रवेशप्रकरणंगद्येनोपसंहरति ॥ इति । श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्तचिन्तामणौगृहप्रवेशप्रकरणंसंपूर्णम् ॥ स्पष्टार्थमेतत् ॥ ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तथापुत्रेणाहिगवीप्रसारितधियामौहूर्त्तचिंतामणेः ॥ गोविंदेन विनिर्मितेनयनिधौपीयूषधाराभिधेव्याख्याने गृहवेशनप्रकरणंसंपूर्णतामागमत् ॥ १ ॥ इति श्रीविद्वद्दैवज्ञमुकुटाऽलंकारश्रीमन्नीलकंठज्योतिर्वित्पुत्रगोविंदज्योतिर्विद्विरचितायांमुहूर्त्तचिंतामणिटीकायां पीयूषधाराभिधायांगृहप्रवेशप्रकरणंसमाप्तिमगमत् ॥१३॥ श्रीकृष्णार्पणमस्तु॥छ॥ अथमुहूर्त्तचिंतामणेर्ज्योतिषग्रंथस्यसमाप्तिंकर्तुकामोग्रंथकृत्तत्सूचनाऽलंकारभूतंस्वपितामहचिंतामणिदैवज्ञवर्णनंशार्दूलविक्रीडितेनाह ॥ आसीदिति।प्रसिद्धःचिंतामणिश्चिंतामणिनामाधर्मपुरेविदर्भदेशप्रदेशविशेषेनर्मदासमीपवर्तिनिमातृपुराख्येआसीत् । कीदृशेधर्मपुरेषडंगनिगमाध्येतृद्विजैर्मंडितेनिगमोवेदःषट्अंगानियस्यासौषडंगः षडंगानिशिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषंचेति षडंगश्चासौनिगमश्चषडंगनिगमस्तस्याध्येतारोऽध्ययनकर्त्तारः । अध्येतृभिरध्यापकाअप्युपलक्ष्यंते। नहिविनाध्यापकंवेदाध्ययनंक्वचिद्दृष्टं। तादृशाःद्विजा ब्राह्मणाःब्राह्मणक्षत्रियवैश्यावातैर्मंडितेभूषितेकीदृशःचिंतामणिःज्योतिर्वित्तिलकः ज्योतींषिनक्षत्राणिलक्षणयातत्प्रतिपादकाग्रंथाज्योतिःशब्देनोच्यंते तान्विदंतितेज्योतिर्विदः ' सत्सूद्विष ' इत्यादिनाक्विप् । ज्योतिर्वित्सुतिलकएवज्योतिर्विच्छ्रेष्ठइत्यर्थः । पुनःकीदृशःफणींद्ररचिते फणींद्रःशेषोमहानागस्तेनरचितेभाष्येव्याकरणमहाभाष्येकृतोऽतिश्रमोऽत्यभ्यासोयेनसः महाभाष्याध्ययनपारग इत्यर्थः । पुनःकीदृशःतत्तज्जातकसंहितागणितकृत् तानितानिस्वल्पबृह

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ष्ये कृतातिश्रमः॥ तत्तज्जातकसंहितागणितकृन्मान्यो

दादिभेदेनानेकविधानिजातकानिजातकशास्त्राणिसंहिताः संहिताशास्त्राणिगणितानिग णितशास्त्राणिकरोतितादृशः होरासंहितागणितरूपस्कंधत्रयात्मकस्यज्योतिःशास्त्रस्यस्व पद्यैर्निर्मातेत्यर्थः । अनेनमहाकविरित्यपिसूचितं । पुनःकीदृशः महाभूभुजां सकलजं बूद्वीपवर्तिराजमुकुटमणीनां महतांराज्ञां पातिशाहादीनांमान्यः पूज्यः महाराजमान्यं इत्यर्थः । पुनः कीदृशःतर्कालंकृतिवेदवाक्यविलसद्बुद्धिः तर्कोन्यायशास्त्रं अलंकृतिर लंकारशास्त्रं वेदवाक्यंवेदवाक्यविचारप्रतिपादकोग्रंथोमीमांसाशास्त्रंवेदांतशास्त्रंचतेषुवि लसंतीविलासयुक्ताबुद्धिर्यस्यसः ।'द्वंद्वांतेश्रूयमाणंपदंप्रत्येकमभिसंबध्यते'इतिन्यायात्त र्कशास्त्रज्ञःअलंकारशास्त्रज्ञः मीमांसाज्ञोवेदांतज्ञश्चेत्यर्थः।आसीति' असूभुवि' इत्यस्माल्ल ङि"आडजादीनाम्"इत्याट् "श्नसोरल्लोप" इत्यकारस्यलोपः षडंगनिगमाध्येतृद्विजैरि त्यत्रसमस्तपदेषडंगनिगमइत्यत्र "तत्पुरुषःसमानाधिकरणःकर्मधारय" इति कर्म धारयःसमासः । अध्येतृशब्देच'इङ्अध्ययन' इत्यस्मादिङिकावध्युपसर्गान्नव्यभिच रतइत्युक्तेरधिपूर्वकात् " ण्वुल्तृचौ " इतिकर्तरितृच् " सार्वधातुकार्धधातुकयोः " इतिगुणः ततोयणादेशः । ततःषडंगनिगमस्याध्येतारइति " षष्ठी " इतिषष्ठी समासः । नन्वत्रकथंषष्ठीसमासः यावता " कर्तृकर्मणोःकृती " तिकर्म णिशेषेषष्ठीउत " षष्ठीशेषे " इतिसंबंधसामान्यषष्ठी । तत्रयदिविशेषषष्ठीतदा "कर्तरिच" इतिकर्त्रर्थोत्पन्नाभ्यांतृजकाभ्यांकर्मषष्ठीसमासनिषेधप्रसंगः । नचतृचमंगी कृत्यैतद्दूषणंत्वयादापितमेवनांगीकुर्मः । किंतुतच्छीलाधिकारविहितंतृचंविधास्यामः । तद्योगेप्राग्वदेवषष्ठींविधाय षष्ठीसमासोभविष्यतीतिवाच्यं 'एकंसंधित्सतोऽपरंप्रच्यवते' इति न्यायेन "नलोकाव्ययनिष्ठाखलर्थतृनाम्" तितृनोयोगेषष्ठ्येवनास्तिकुतस्तरां षष्ठीसमासः । ननुचनायंकृद्योगनिमित्तकर्मषष्ठ्यासमासः किंतर्हिषडंगनिगममधीयत इति विगृह्यतृन्यानीते "उपपदमतिङ्"इत्युपपदसमासेकृतेषडंगनिगमाध्येतारइति भ विष्यत्येव किंकल्पनांतरेणसदूषणेन । नचसोपपदाद्धातोस्तृज्विधानंनास्तीतिवाच्यं । 'हिमवच्छ्रोताआदित्यद्रष्टा' इत्यादिमहाभाष्यकारप्रयोगेष्वसमाधानंस्यादिति । एवंतर्हि कर्मण्युपपदे "कर्मण्यण्" इत्यण्प्रसज्येत । ततश्चषडंगनिगमाध्येयाइतिस्यात् । त स्माद्विशेषषष्ठीमंगीकृत्यानुपपन्नः षडंगनिगमाध्येतारइतिप्रयोगः । सत्यं । ज्ञापकाद्भ विष्यतिसमासः । किंज्ञापकं "जनिकर्तुःप्रकृतिः"इति । अनेन "कर्तरिच"इतिषष्ठीसं मासप्रतिषेधोनित्यइति ज्ञाप्यतइत्यनित्यत्वंषष्ठीसमासप्रतिषेधस्य मनसिनिधायसाधुत्व मंगीकृतवानस्यप्रयोगस्यग्रंथकृत् । अतएव 'भीष्मःकुरूणांभयशोकहंता' 'कालचक्र प्रयोक्तारं' 'सैवसिद्धांतवेत्ता' इत्यादयोमहाकविप्रयोगाउपपन्नाभवंति । एवमेवविवाहप्रक रणेभवति 'विवाहविनाशकारकोयम्' इति 'पापौकर्तरिकारकौ' इत्यत्रविवाहविनाशकार

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

महाभूभुजां तर्कालंकृतिवेदवाक्यविलसद्बुद्धिः स चिंतामणिः ॥ ८ ॥ ज्योतिर्विद्गणवंदितांघ्रिकमलस्तत्सूनुरासीत्कृती नाम्नाऽनंत इति प्रथामधिगतो भूमंडलाहस्करः ॥ यो रम्यां जनिपद्धतिं समकरोद्दु-

कइति ' कर्तरिकारकौ ' इत्यनयोःप्रयोगयोरिदानीमुक्तं । पूर्वपक्षयोर्ज्यायस्त्वात् " तत्प्रयोजकोहेतुश्च " इतिज्ञापकान्निषेधान्नित्यमंगीकृत्यसमाधिरंगीकार्यः । अतएव ' निजत्रिनेत्रावतरत्वबोधिकाम् ' इत्यादियोगोपपत्तिः । यदितुसंबंधमात्रेषष्ठीतिमतंतदाकर्मषष्ठ्यभावादेव ' कर्तरिच ' इतिनिषेधाभावात्सुखेनषष्ठीसमासः । अथवाषडंगनिगममध्येतुंशीलंयेषांतेइतिविगृह्यतच्छीलाधिकारविहितंतृनंविधायगम्यादीनामिष्टिरितिगम्यादेराकृतिगणत्वात्तृनोयोगेषष्ठ्यभावाच्च द्वितीयातत्पुरुषसमासइत्यलमतिप्रसंगेनेति शिवम् ॥८॥ अथक्रमप्राप्तंतातवर्णनंशार्दूलविक्रीडितेनाह ॥ ज्योतिर्विद्गणेति ॥ तत्सूनुस्तस्यचिंतामणिर्दैवज्ञस्यसूनुःपुत्रोऽनंतइतिनाम्नाप्रथांख्यातिमधिगतः प्राप्तआसीत्।कीदृशः ज्योतिर्विद्गणवंदितांघ्रिकमलः ज्योतिर्विदांज्योतिषिकाणांयोगणःसमूहस्तेनवंदिते अंघ्रिकमलेचरणसरोरुहेयस्यतादृशः सकलज्योतिर्विदांज्योतिःशास्त्राध्ययनेएषएवाध्यापकइत्यर्थः । पुनः कीदृशः भूमंडलाऽहस्करः भूमंडलस्यपृथ्वीमंडलस्याहस्करः सूर्यः प्रकाशकत्वात् । यथासूर्यः स्वकिरणैरखिलांपृथ्वींप्रकाशयति तथाज्योतिःशास्त्राध्ययनद्वारापृथिव्याः प्रकाशकइतिभावः । पुनः कीदृशः कृतीकुशलः ' कृतीकुशलइत्यपि ' इत्यमरः । नानाग्रंथकरणकुशलइत्यर्थः । ग्रंथकर्तृत्वमेवोत्तरार्धेनप्रकाशयति । यो रम्यामिति । योऽनंतःजनिपद्धतिंजनिर्जन्म ' जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः ' इत्यमरः । तस्यपद्धतिर्मार्गः भावादीनामंतर्दशांतगणितेनजातकशास्त्रोक्तशुभाशुभफलकालोपदेशप्रतिपादकोग्रन्थोजन्मपद्धतिस्तांसमकरोत्सम्यक्चकार । सम्यक्क्रमेवाह । कीदृशींजनिपद्धतिंदुष्टाशयाध्वंसिनीं दुष्टाःजन्मपद्धतिमार्गसंप्रदायानभिज्ञास्तेषामाशयोभिप्रायोयुक्त्यावैपरीत्याख्यानंतंध्वंसितुंशीलंयस्याःसातादृशीं । यथा ' आद्यादशाचेत्सवितुर्विधोर्वातदाबलं संस्कृतमेवतस्य ' इतिश्रीपतिवाक्येसंस्कृतमिष्टकष्टवलांतरेणगणितमिति जातकालंकाराख्यटीकाकृताव्याकृतम् । तत्रादिशर्मपद्धतिवाक्यं संमतित्वेनदर्शितंतदुभयमपिचिंत्यम् । चिंत्यप्रकारस्त्वनुवादपूर्वकः स्वपद्यैरेवोपनिबद्धः । यथा " यइष्टकष्टांतरविघ्नवीर्याद्दशाक्रमंरिष्टमनिष्टभंगं । विचारयंतीहनमोस्तुतेभ्यःश्रीश्रीधरोक्तंबहुसंमतंसत् ॥ यस्येष्टकष्टेसदृशेभवेतांतदंतरघ्नंबलमेवशून्यं । यदातदासौबलवान्प्रवीर्योवेत्थंविचिंत्यंभुवदोचितंहि । यतःशुभंवाप्यशुभंग्रहस्यवीर्यंसहैवास्तिनतस्यहानिः । तस्मान्नानाशोविवरेऽनयोस्तुद्वैधंफलाप्त्यैनदशाक्रमादौ ॥ " इति । एवमन्येषुस्थलेषुदुष्टाशयनिराकरणंकृतमिति । अतःरम्यांदोषापाकर

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi